## श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीया परीक्षा - प्रथमपत्रिका

**दिनाङ्कः** – 06-09-2026 **अङ्काः** – १००

**पूर्वाह्णः** – १०:०० तः १:०० पर्यन्तम् **समयः** – होरात्रयम्

ಸೂಚನೆಗಳು: ೦. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.

೧. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

1. **पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत ।** 5

    1. गणेशं कदा नमस्कुर्वन्ति ?
    2. कालिदासः कः ?
    3. श्रीशङ्करभगवत्पादाचार्यस्य गुरुः कः ?
    4. पितामहः आत्मानं कथं दर्शितवान् ?
    5. केषां बन्धनं भवति ?
    6. सीता मारुतेः करे काम् अददात् ?

2. **षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 12

    1. एकलव्यः कः ? सः गुरुदक्षिणार्थं किं प्रादात् ?
    2. 'प्राकाम्यं ते विभूतिषु' – कथम् ? वर्णयत।
    3. श्रीशङ्करभगवत्पादाचार्यैः कुत्र कुत्र मठाः स्थापिताः ?
    4. धर्मव्याधः कः ? सः कीदृशः आसीत् ?
    5. विक्रमः फलं कस्मै किमर्थं प्रायच्छत् ?
    6. हनूमान् सीतां कथम् आश्वासयामास ?
    7. मल्लस्य नाम किम् ? तस्य कथायाः नीतिः का ?

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत ।** 9

    1. पञ्चतन्त्रस्य रचयिता कः ? तत् किमर्थं तेन रचितम् ?
    2. एकलव्यस्य गुरुः कः ? अस्त्रविद्यायां प्रावीण्यम् कथमलभत ?
    3. चित्रग्रीवः कः ? स स्वाश्रितान् कथं ररक्ष ?
    4. विष्णोराकारः कीदृशः ? सः कैर्ध्यानगम्यः ?

4. **चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत ।** 12

    1. "पतिव्रतायाः माहात्म्यम् " अस्य पाठस्य सारांशं लिखत ।
    2. "ब्राह्मणः सर्पश्च" इति पाठस्य कथासाराशं लिखत ।
    3. "रामोदन्ते सुन्दरकाण्डः" अस्य पद्यांशस्य सारांशं लिखत ।

4. श्रीशङ्करभगवत्पादाचार्यस्य जीवनम् । ।

5. “आहारशुद्धौ सत्वशुद्धिः” इदं वाक्यं पाठानुसारेण विशदयत ।

**5. चतुर्णां ससन्दर्भं मातृभाषया विवृणुत ।** **12**

1. "मनुष्याणां शरीरस्थो रिपुः क्रोधः " ।
2. " अतिथिसत्कारः श्रेयस्करः: " ।
3. " स्वायंभुवं ययुः" ।
4. " तत्रभवद्भिः सन्निहितैर्भवितव्यम्” ।
5. " सीतेयमिति तर्कयन् " ।

**6. द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत ।** **4**

१. त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥

२. नीतिमान् सोऽपि सञ्चिन्त्य बभञ्जोपवनं च तत् ।
अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत् ॥

३. अधीते य इदं नित्यं नीतिशास्त्रं श्रृणोति च ।
न पराभवमाप्नोति शक्रादपि कदाचन ॥

**7. श्लोकद्वयं पूरयत ।** **4**

1. निन्दन्तु ---------------------------------------- धीराः ॥
2. सुखार्थी -------------------------------------- सुखम् ॥
3. आद्यायामित ------------------------------------ शम्भवे ॥

**8. अस्य गद्यस्यास्य अनुवादं कुरुत।** **3**

स तु प्रतिदिनमेकं निष्कं दीयते चेत् तदेवालमिति न्यवेदयत् । राजा तथैवादापयत् । स तदा प्रभृति दिने दिने मृष्टान्नादिकं भोज भोजं मदगजायते स्म ।

**9. रिक्तस्थानानि पूरयत ।** **3**

1. केवलं जगति तेऽपि _____________ ।
2. अद्यतना अप्याचार्याः _____________ देशाद्देशं व्रजन्ति।
3. अतिथिभ्योऽपि तव पतिरेव _____________ मन्यसे ।

**10. त्रयाणां पर्यायपदानि लिखत ।** **3**

1. ब्रह्मा 2. आस्यम् 3. भुजङ्गमः 4. अन्तिकम्

**11. त्रयाणां विरुद्धपदानि लिखत ।** **3**

1. बन्धनम् 2. सृष्टिः 3. उपकारम् 4. सूक्ष्मः

**12. त्रीणि पदानि संस्कृतवाक्येषु योजयत ।** 3

1. उक्त्वा 2. वेत्ति 3. तुल्यम् 4. अस्माकम्

**13. त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत ।** 3

1. एतांश्च 2. स्वर्लोक: 3. अब्रवीच्च 4. जगद्गुरु:

**14. वाक्यदोषं परिहरत । (त्रयाणाम् एव)** 3

1. बालिकस्य हस्ते तालीपत्रमयं पुस्तकमासीत् । 2. परमेश्वरं मुक्तिं भजतु ।
3. श्रीराम: मारुतिं करात् अस्पृशत् । 4. सा मनसेन पूजां करोति ।

**15. सुबन्त-तिङन्त-अव्ययानि पृथक् कृत्वा लिखत ।** (द्वावेव) 3

1. महावीरान् मल्लान् शतमप्येकधैव जयेयम् ।
2. धीराः <u>न्यायात्</u> पथः पदं न प्रविचलन्ति ।
3. द्रोणस्तु मुहूर्तं विचार्य अर्जुनेन सह वनमगच्छत्।

**16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत। (द्वयोः)** 4

1. क्लेश:-------------------------वरम् । 3. सम्भावितस्य ---------------अतिरिच्यते।
2. यादृशं ------------------------- तादृशी।

**17. संयोज्य लिखत ।** 4

| अ | आ |
|---|---|
| 1. गवेषमाण: | क्त प्रत्यय : |
| 2. कारयामास | शतृ प्रत्यय : |
| 3. प्रणम्य | वर्तमानकृदन्त : |
| 4. कृतम् | णिजन्त: |
| | ल्यबन्ताव्ययम् |

**18. व्याकरणविशेषं लिखत ।** 2

1. विषादं मा कृथाः 2. मात्रे नम:

**19. रेखाङ्कितपदमधिकृत्य प्रश्नवाक्यं कुरुत।** 2

1. राजा <u>प्रजानां</u> हितमिच्छति।
2. अर्जुन: <u>अस्त्रविद्यायां</u> निपुण: ।

**20. समूहेतरपदं पृथक् कृत्वा लिखत।** 2

1. प्राक्, पश्चात्, क्षणम् , अन्तः।
2. स्त्रीपुंसौ, हरौ, भ्रातरौ, पितरौ ।

**21. चतुर्थपदं लिखत।** **2**

1. बदरी – तोटकाचार्यः :: शृङ्गेरी – --------------
2. अनिलात्मजः – अनिलस्य आत्मजः :: मारुतिः – ------------

**22. प्रयोगपरिवर्तनं कुरुत।** **2**

1. सः देवस्य पूजां न कृतवान्।
2. न मया विद्याविक्रयः क्रियते।

*************